


# उपदेशपदोपनिषद्

पदं
यत् परमं
पदम्

याकिनीमहत्तरासूनु-भवविरहाङ्क-आचार्यवर्य-
**श्रीहरिभद्रसूरिवरविरचित-उपदेशपदमहाग्रन्थस्य**
सारसञ्चयरूपा

# उपदेशपदोपनिषद्

• सञ्चयनम् •

स्वाध्यायामृतनिमग्नाः **प.पू.आ.श्रीगुणानन्दसूरयः**

• सम्पादनम् •

प्राचीनश्रुतोद्धारक

**प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः**

**प.पू.आ.श्रीकल्याणबोधिसूरयः**

**प्रकाशकः**

श्री जिनशासन आराधना ट्रस्ट

મૂળ ગ્રંથ : **ઉપદેશપદમહાગ્રન્થ**

મૂળ ગ્રંથકાર : યાકિનીમહત્તરાસૂનુ ૧૪૪૪
ગ્રંથ રચયિતા
પ.પૂ.આચાર્યવર્ય શ્રીહરિભદ્રસૂરિ મહારાજા

સારસંચય : **ઉપદેશપદોપનિષદ્**

સંચય : **પ.પૂ.આ.શ્રી ગુણાનન્દસૂરીશ્વરજી મહારાજા**

સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

પુનર્લેખન : મુનિરાજશ્રી રાજપ્રેમ વિજયજી મ.સા.

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

• પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦ •

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

પદ

પળમાં જ

આપી શકે છે જે

પરમપદ.

ચાલો,

પામી જઈએ.

- આ. કલ્યાણબોધિસૂરિ

# उपदेशपदम् ।

महाभागं **महावीरं** नमिउण उवएसपयं वोच्छं।

**लद्धूण माणुसत्तं कहंचि अइदुल्लहं भवसमुद्दे।**
**सम्मं निउंजिअव्वं कुसलेहि सयावि धम्मंवि।।**

**कथमपि** - प्रकृत्या तनुकषायत्वात्, दानरतित्वात्, मध्यमगुणयुतत्वात्। सर्वकालमेव चारित्रश्रुतधर्मे। अत्रार्थ इयं

अनुमानमुद्रा - ‘जीवो मानुष्यं लब्ध्वा पुनः दुःखेन लप्स्यते’ इति प्रतिज्ञा, अत्र हेतुः - अकृतधर्मत्वेन सति बह्वन्तरायत्वात्। अत्रार्थे दृष्टान्ताः -

**चोल्लग-पासग-धन्ने,**
**जूए रयणे य सुमिणचक्के य।**
**चम्मजुगे परमाणू**
**दस दिट्ठंता मणुअलंभे॥**

(१) ब्रह्मदत्तचक्रवर्त्तिमित्रस्य ब्राह्मणस्यैकदा चक्रवर्त्तिगृहे प्राप्तभोजनस्य सकलभरतक्षेत्रवास्तव्यराजादिलोकगृहपर्यवसाने

पुनश्चक्रवर्तिगृहे **चोल्लका**परनामभोजनवत्।

(२) चाणक्य**पाशक**वत्।

(३) भरतक्षेत्रसर्व**धान्य**मध्यप्रक्षिप्त-सर्षपप्रस्थपुनर्मीलनवत्।

(४) अष्टाधिकस्तम्भशतोष्टोत्तराश्रि-शताष्टसमर्गलशतवारनिरन्तर**द्यूत**जयवत्।

(५) महाश्रेष्ठिपुत्रनानावणिग्देशवि-क्रीत**रत्न**समाहारवत्।

(६) महाराज्यलाभस्वप्नदर्शनाका-ङ्क्षिकार्पटिकतादृश**स्वप्न**लाभवत्।

(७) मन्त्रिदौहित्रराजसुतसुरेन्द्रदत्ता-
ष्टचक्रारकपरिवर्तान्तरित**राधावेध**वत्।

(८) एकच्छिद्रमह**च्चर्मा**वनद्धमहा-
ह्रदसंभूतकच्छपग्रीवानुप्रवेशोपलब्धपुनस्त-
च्छिद्रलाभवत्।

(९) महासमुद्रमध्ये विघटितपूर्वा-
परान्तविक्षिप्त**युगे** समिला - छिद्रानु-
प्रवेशवत्।

(१०) अनन्तपरमाणुसंघातघटितदेव-
संचूर्णितविभक्तत**त्परमाणु**समाहारजन्यस्तम्भ-
वद् वा।

**अज्ञानप्रमाददोषत** एकेन्द्रियाणां कायस्थितेर्दीर्घत्वेनोक्तत्वात्, तत्र एकेन्द्रियाणामसङ्ख्याताः, वनस्पतीनां च अनन्ता उत्सर्पिण्यः, सा च श्रुतचारित्रधर्मबाह्यचित्तानामसकृद्दोषासेवनतः, अतः सर्वप्रमादत्यागेन यत्नः कार्यः।

**सम्यक्त्वं** तु सर्वज्ञाज्ञागमानुसारेण या चैत्यवन्दनादिरूपा प्रवृत्तिश्चेष्टा। सूत्रग्रहणे प्रथमतो यत्नः कार्यः, तद्ग्रहणं च विनयवता कार्यं श्रेणिकवत्।

**सूत्रपरिणतिः** :- विधिना गुरुविनयेन

कुर्वतो भवति, नान्यथा, मिथ्यात्वज्वरोदये सूत्रमपि दोषमूलम्। एवं च गुरुणापि योग्यानामेव सूत्रोक्तविध्यनुसारतः सूत्रदानं कर्तव्यम्, सिद्धाचार्यवत्। नन्दसुन्दरी-ज्ञातम्।

**आसन्नसिद्धेर्लिङ्गम्ः** - सर्वत्र सूत्रा-नुसारत उचितत्वेन प्रवृत्तिः, जिने बहुमानः, अन्यथा भगवदाज्ञावितथाचरणेन स्वपर-दुर्गतिः स्यात्। अत एवैतत्तत्त्वानां बोधकः अतिनिपुणबुद्धिसमन्वितः।

**बुद्धिभेदाः** - औत्पातिकी, वैन-यिकी, कार्मिकी, पारिणामिकी।

(१) **औत्पातिकी** - पूर्वमदृष्ट-अश्रुत-मनसाऽनालोचिततत्क्षणविवक्षित-गृहीतार्था। अव्याहतफलयोगा।

(२) **वैनयिकी** - अतिगुरुकार्यपार-प्रापणसमर्था, त्रिवर्गार्जनपरप्रतिपादनपरक-सूत्रार्थसारा, उभयलोकफलावहा, विनय-समुत्था।

(३) **कर्मजा** - विवक्षितकर्मणि मनसअभिनिवेशपरमार्था, कर्माभ्यासवि-चारविशाला, साधुकारफलवती।

(४) **पारिणामिकी** :- अनुमान-

हेतुदृष्टान्तसाधिका, वयोविपाकपरिणामा, पुण्यमोक्षफलवती, अभ्युदयनिःश्रेयस-साधिका। कुशला बुद्ध्या दूरमपि स्थितं प्रेक्षन्ते, बुद्धिमता पापक्षयादेव कुशल-बुद्धिप्राप्तेः।

एषा बुद्धिस्तु जायते बुद्धिमतां भक्त्या, बहुमानतः, अप्रद्वेषतः, प्रशंसातः।

**कल्याणमित्रयोगः** - कर्मपरिणा-मात् पुण्यानुबन्धिपुण्यकारकत्वात्, तथा-भव्यत्वात् च। तेषां भव्यानां कल्याण-मित्रयोगात् सर्वत्रोचितप्रवृत्तिसंभवः।

**सम्यक्त्वं** तु कालस्वभावनियतिपूर्व-कृतपौरूषाणां समासः।

**मिथ्यात्वं** तु तेषामेवैकान्तेन कारण-त्वाभ्युपगमः। सर्वकार्याणामयमेव कारण-कलापो जनकः, अत एव दैवपुरुषकार-योर्विषयविभाग उपपद्यते। बुद्धियुक्त एवो-पाधिशुद्धं धर्मस्थानमालोचयति, आत्मनो योग्यतामनुबन्धं च जानाति। सम्यक् यथा-विषयज्ञानाद् नारदवत्। तथा च सम्य-गारंभकत्वात् न लाघवं प्राप्नोति, गौरवं च लभते, रोहिणीदृष्टान्तम्, प्रकृष्टफलसाधक-

मनुगमपि निरूपयति-

**धर्मस्य स्थानम्** - अहिंसा- एषा सार इति सर्वपरित्यागेन एको बालतपस्वी अगीतार्थो वा यतते।

**श्रूयतां धर्मसर्वस्वं,**
**श्रुत्वा चैवावधार्यताम्।**
**आत्मनः प्रतिकूलानि,**
**परेषां न समाचरेत्॥**

**अन्यस्तु** आगमत अहिंसास्वरूपं मीमांसते। आगमं च शृणोति गुरूभ्य-स्सकाशाद् विधिना, सर्वज्ञवचनानुसारेण

कुरुते। तत्र **हेतुहिंसा**- 'प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा' इति **हेतुः**।

**स्वरूपम्** - प्राणव्यपरोपणं, **फलं** तु दुःखमेव हिंसाया इति।

अत आगम एवातिशयेन यत्नं करोति, यतः 'जं आणाए चरणं' इति आधाकर्मादिदानतः सिद्धम्।

**शास्त्रम्**-अन्तःकरणरत्नस्य शोधकम्, परा मुक्तिदूती। आज्ञाबाह्यं शुद्धमपि दुष्टमेव, आज्ञानिरपेक्षस्याशुद्धपरिणामवत्त्वात्, आज्ञाराधनयाऽशुद्धमपि आधाक-

र्मादिकं शुद्धमेव, आज्ञासापेक्षत्वात्, भगवति बहुमानात्, असद्ग्रहत्यागात्। आज्ञानिरपेक्षस्य तु शुभोऽपि भावो मोहाद् न शुभः पर्यन्तदारूणत्वात्, गलमत्स्य-भवमोचकविषान्नवद् मोहस्य प्रबलत्वे मन्दोऽपि रागादिपरिणामो न शुभः।

(१) **रागः** - **स्नेहरागः** - जनकादि-स्वजनगोचरः।

**कामरागः** - विप्रियप्रमदादिविषय-साधनगोचरः।

**दृष्टिरागः** - दर्शनिनां निजनिजदर्शनेषु रागः।

(२) **द्वेषः** - मत्सरः सचित्ताचित्तादिद्रव्यगोचरः

(३) **मोहः** - मिथ्यात्वमोहोदयजातः, गुणवत्प्रज्ञापनीयपुरुष-प्रज्ञापनयाऽपि असाध्यः, मोहस्य प्रबलत्वे राग-द्वेषयोर्मन्दत्वं वस्तुतो न मन्दत्वम्, सन्निपातावस्थागतस्य यथा दुःखपरिणामोऽधिकस्तथैवाज्ञाबाह्यानां रागद्वेषमान्द्याद् उपशमात् किञ्चित्कालं राज्यादिसुख-लाभेऽपि पापानुबन्धिपुण्यवशात् पर्यन्त-दारूण एव ब्रह्मदत्तादीनामिव। तौ रागद्वेषौ

पापानुबन्धिसातवेद्यादेर्मिथ्यात्वमोहस्य च बन्धहेतू।

भवान्तरे च तत्पुण्यविपाकेन मोहात् पुण्यकर्मनाशे सति इतो नारकादिदुःख-भाक्। मण्डूकचूर्णकल्पः क्रियाजनितः कर्मक्षयः, भावनातस्तु **तद्भस्मचूर्णवत्**, सुवचनयोगयुक्तसम्यक्क्रियातः क्लेशाना-मपुनर्भावेन नाशः।

**माषतुषादी**नां तु मार्गानुसारित्वात् शुभौघसंज्ञानयोगात् परिणामः शुभ एव। इदं च **शुभयोगसंज्ञानम्**- तथाहि रौद्रः

खलु संसारः, पञ्चनमस्कारविधिदानं, शक्त्यनुरूपाहिंसा, इन्द्रिय-कषायविजय-रूपः शुद्धो धर्म अस्य संसारस्य क्षयहेतुः, तन्निवृत्तिकारित्वात्।

स शुद्धधर्मः परमार्थतो गुरुकुलवासे सति भवति,गुरोराज्ञां पालयन्नेव सर्वं कुरुते। एकाकिमोचनेऽपि गुरुकुलवासप्रवृत्तां सामाचारीं सर्वामनुतिष्ठते।

**चन्द्रगुप्तस्य** यथा चाणक्ये न सर्वथा विभ्रमः, ततोऽपि अधिको विश्वासो गुरौ विजृम्भते। अन्यत्रापि जीवादौ विषये-

ऽविभ्रम एवात्यन्ततत्त्वजिज्ञासावतोऽपि तत्त्वविपर्यासहेतूनामत्राभावात्, अनन्तानु-बन्धिमिथ्यात्वक्षयोपशमात्।

विपर्यय एव महान् दोषः, न अनध्य-वसायसंशयौ, विपर्ययादेवासत्प्रवृत्तिः, ततः सर्वानर्थम्।

## चारित्रलक्षणम्

**मग्गाणुसारी सड्ढो,**
**पण्णवणिज्जो कियापरो चेव।**
**गुणरागी सक्कारंभसंगओ**
**जो तमाहु मुणिं॥१९॥**

**एयं च अत्थि लक्खणमिमस्स**
**निस्सेसमेव धन्नस्स।**
**तह गुरुआणासंपाडणं उ**
**गमगं इहं लिंगं॥२००॥**

**साधुसामाचारीपालनरूपगुर्वाज्ञासंपादकत्वात्।**

सति सामर्थ्य उचितप्रवृत्त्या यतनीयम्। अन्यथा दोषसंभवः, आर्यमहागिरिवत्। एवं च सुपरिशुद्धाऽऽज्ञाराधना स्तोकाऽपि परिपूर्णाया हेतुः। संस्तारकपरावर्तम्, अभिग्रहः, विहारप्रतिमा, एवं

चाज्ञापरतन्त्रैर्बीजाधानं कर्तव्यम्, जिनेषु कुशलं चित्तमित्यादि।

**बीजं** स्तोकमपि अनघम्, कर्मोपशमात्, सद्धर्मानुगतत्वात्, उपाधिशुद्धत्वात्, प्रणिधानादिसहितम्, तद्धर्मबीजमनाख्येयम्, शुद्धभावानामनुभवसिद्धम्, भवक्षयकरम्, तस्माद् ओघतो वीतरागवचने बहुमानः कार्यः। आज्ञया प्रवृत्तौ अपि न तादृशबुद्ध्यभावेन कार्यं साधयति, तादृशवैयावृत्यकारिअनिपुणबुद्धिगम्यवत्।

**निपुणमतिस्तु** एवं विभावयति-

पुरिसं तस्सुवयारं,
अवयारं वऽप्पणो य णाऊणं।
कुज्जा वेयावडियं,
आणं काउं निरासंसो।।२३७।।

शुद्धाऽऽज्ञाबहुमानात् पुण्यानुबन्धिपुण्यरूपं विशिष्टं फलं, निरनुबन्धाशुभकर्मरूपं च। तथा चाचार्यवचनम्-

भावणाबहुमाणाओ,
सत्तिओ सुकिरिआपवित्ति वा।
नियमेण चिय इहरा,
ण तओ सुद्धो त्ति इट्ठा सा।।२३९।।

एईए उ विसिट्ठं,

सुवन्नघडतुल्लमिह फलं नेयं।

अणुबन्धजुयं संपुन्न -

हेउओ सम्ममवसेयं॥२४०॥

दया भूतेषु वैराग्यं

विधिवत्गुरुपूजनम्।

विशुद्धा शीलवृत्तिश्च,

पुण्यं पुण्यानुबन्ध्यदः॥

आज्ञाबहुमानशून्यानां क्रियामात्रं तु अन्यापेक्षं भवति न तु गुरुलाघवादिज्ञानेन, अत एव मृन्मयघटतुल्या सा, तस्मात्स-

र्वप्रयत्नेन परलोके शुद्धो भावः कार्यः। य आज्ञां बहु मन्यते स तीर्थंकरं गुरुं धर्मं हितमर्थं साधयति।

इदं तु आज्ञापारतन्त्र्यं न अभिन्न-ग्रन्थिकानाम्, अनाभोगतः प्रतिस्रोतगामि-नामपि न।

**द्रव्याज्ञा** - तेषां ग्रन्थिकसत्त्वानां मार्गपतितानां मार्गाभिमुखानाम्।

**प्रधाना द्रव्यता** - भावाज्ञाकारणी-भूता, गोविन्दवाचकस्येव।

**अप्रधाना द्रव्यता** - भावाज्ञां प्रति न कारणता, अभव्यानां ग्रन्थिकसत्त्वानां च, अङ्गारमर्दकवत्।

**अप्रधानद्रव्याज्ञालिङ्गानि** - (१) अभिधेयार्थपर्यालोचनाभावः (२) गुणानुरागो न (३) अपूर्वलाभाद् न विस्मयः (४) न भवभयम् च।

**प्रधानद्रव्याज्ञालिङ्गानि** - (१) अभिधेयार्थपर्यालोचनम् (२) गुणानुरागः (३) अपूर्वलाभाद् विस्मयः (४) भवभयं च।

**भावाज्ञा** - सम्यग्दृष्टेः सम्यक्त्वतया नियमात्, प्रशमादिहेतुसद्भावाद् निर्वाण-साधकत्वात् अतिनिपुणमत्या हिताहित-विवेचकत्वात् कृत्ये प्रवर्त्तते। प्रायः कार्यं च साधयति। प्रायोग्रहणं कदाचित् कस्यचित् प्रतिबन्धात्।

**स च प्रतिबन्धः** - जघन्यः, मध्यमः, उत्कृष्टः। यथाक्रमं कण्टक-ज्वर-दिङ्मोह-समानाः, मेघकुमार - दहनसुर - अर्हद्दत्तज्ञातानि च ज्ञेयानि।

अत एव धर्मबीजं प्राप्य बुद्धिमता-

ऽप्रमत्ततया यत्नः कार्यः। प्रमादोऽष्टविधः, [१]अज्ञान-[२]संशय-[३]विपर्यय-[४]राग-[५]द्वेष-स्मृतिभ्रंश[६]-[७]योगदुष्प्रणिधान-[८]धर्मेऽनादरभेदात्।

**धर्मबीजशुद्धेः फलम्**- परिशुद्धाज्ञायोगात् प्राय आत्मचिन्तायुक्तानां परत्र बधिरान्धमूकभावापन्नानामतिरौद्रमपि कर्म न फलवद् भवति, तत्प्रकारस्वाभाव्यादेव, व्याधिविशेषवत्, भोजनविशेषवद्वा, परिशुद्धाज्ञायोगात् कर्मणामुपक्रमः, ततो भावारोग्यम्। कर्मणामुपक्रमो वीर्येण, स च

पुरुषकारः। स एवाज्ञायोगः, अत्र ज्ञान-गर्भमन्त्रीदृष्टान्तम्।

दैवपुरुषकारौ च द्वौ अपि सदृशसामर्थ्यौ। यदि ह्येकस्यैव कार्यमायत्तं स्यात् तदा द्वितीयनिष्फलत्वापत्तेः। अथ पुरुषकारसमर्थनम् - न च योग्ये नियमात् प्रतिमादिसंभवः। न च अयोग्यता तल्ल-क्षणाभावात्। अतः पुरुषकारादेव प्रतिमाया भवनम्, एवं पुरुषकारसापेक्षं दैवमपि स्वफलकारणम्।

यदि योग्यतया एव प्रतिमा भवति तत

इयं योग्यता सर्वत्र वर्तते। न चैवं शिष्ट-व्यवहारः। एवं च यदि कर्मैव पुरुष-कारमाक्षिपति ततो न दानादीषु पुण्यादि-भेदः। अथ तत्कर्म मनःसापेक्षं चेत् पुरुष-कारस्येदृशत्वे को दोष ? अत्र च परंपरया कर्मापि तादृशं वाच्यम्। एवं पुरुषकारोऽपि ज्ञेयः।

अतो द्वयोः **परस्परानुवर्तनेन कार्य-कारणभावः**। स च गुणप्रधानभाव एव।

**दैवकृतम्** - यत्स्तोकेनापि कालेन फलमाक्षिपति। पुण्यसार-प्रथम-अन्त्य-

चक्रिदृष्टान्तानि। दूतदृष्टान्तं च।

**पुरुषकारकृतम्**- यत्तु प्रभूतेन पुरुषकारेण फलमाक्षिपति। विक्रमसारज्ञातमत्र।

अतो मतिमता शुद्धाज्ञायोगतो धर्मस्थाने तदितरप्रसाधकतया यतनीयम्। धर्मानुष्ठानस्यायं स्वभावो यदुत **तदितरधर्मानुष्ठानमनुबध्नाति**। प्रदीपस्य कार्यान्तरसाधककज्जलनिर्माणवत्।

अयं च **शुद्धाज्ञायोगः** - यथाविध्यनुष्ठात्, सानुबन्धत्वात्, सम्यग्दर्शननिर्मलता भवति। अत एव दूरभव्याभव्यानां तुल्या-

नुष्ठानवत्त्वेऽपि धर्मस्थानस्य विशुद्धिरत एव भवति। शुद्धाज्ञायोगाद् - अध्यात्मम्- ततो विमर्शः चिकीर्षासारः - ततो नियमादनुष्ठानम्।

**तादृशाज्ञायोगहेतुः** - ग्रन्थिभेदे सति तथाभव्यत्वसंयोगाद् भवति। यथा वेधपरिणामरहिते मणौ न गुणप्रवेशः, तथैवा**भिन्नग्रन्थौ न सूत्रस्याधानं** भवति। तदभावे तस्य श्रुतमप्रधानत्वेन द्रव्यश्रुतम्। तज्ज्ञानस्य विषयप्रतिभासमात्रत्वाद् बालज्ञानवद् हेयोपादेयज्ञानशून्यम्। ग्रन्थिभेदे तु

सत्यपि ज्ञानावरणादिप्रतिबन्धके श्रद्धासद्भावाद् गीतार्थप्रज्ञापनीयत्वाच्च तुच्छमपि **ज्ञानं सम्यगेव, उत्तरत्र परिपूर्ण**लाभात्। याऽपि प्रबलचारित्रकर्मोदयाद् इन्द्रियानुकूलचेष्टारूपाऽसत्प्रवृत्तिर्द्रव्यतो भावतोऽप्रतिबन्धात् **साऽपि मोक्षाऽङ्गम्**, अशुभानुबन्धोच्छेदकत्वात्।

अयं चाशुभानुबन्ध **एव पापः** भवपादपस्य मूलम्, तस्यैव विच्छेदे सम्यग्ज्ञानतो भवपादप उच्छिन्न एव। अयं च रौद्रस्त्यक्तव्यो निन्दादिभिः। प्राप्तसम्यग्दर्श-

नादयोऽपि अत एव हेतोरनन्तसंसारभ्रमणं कुर्वते। एवं च प्रमत्तानां चतुर्दशपूर्वधराणामनन्तकालतयोक्तः संसार उपपद्यते, अस्यैव रौद्रतया। अत एव सर्वदाऽप्रमत्ततया भाव्यम्। साधुप्रद्वेषी क्षुद्रः, चैत्यद्रव्योपभोगी संकाशः, अतिचारयुक्ता अपि तत्फलं भुक्त्वा शुद्धसंयममार्गनिरततया सिद्धाः।

एवं **चाकालप्रयोगे** सति निरर्थकत्वमपकारकत्वं च। अकालस्तु घनमिथ्यात्वकालः। कालस्तु अपुनर्बन्ध-

कादारभ्य।

**घनमिथ्यात्वकाले** - न परलोकः, न जिनाः, न धर्मः, न शीलं, न अष्टमिका ? (सप्तभ्यो नरकपृथिवीभ्योऽधस्तात्)

**कालं** तु एनमेव न मन्यते। तथाविधकुशलवैद्यप्रयुक्तसदौषधवत्। न चाकालप्रयोगेऽपि ग्रैवेयकादिसिद्धिरिति वाच्यम्। सदौषधप्रयोगे कथञ्चिद् व्याधिशमः, ततस्तस्यैव प्रबलोदयः। तस्य ज्ञानं न पारमार्थिकं यतः-

**सदसदविसेसणाओ**

**भवहेउजहिच्छोवलंभाओ।**

**नाणफलाभावाओ**

**मिच्छादिट्ठिस्स अन्नाणं॥४४॥**

**न चैवं** ऋषिघातेऽपि एकस्याराधनाऽपरस्य तु साधुप्रद्वेषलक्षणदोषलवादनन्तसंसार इति **वाच्यम्**। दोषलवस्य प्रायश्चित्तादिनाऽप्रतिकारे सत्येव तथात्वम्, अपरस्य तु प्रायश्चित्ताचरणेन कृतप्रतिकाराद् न तथात्वमिति। यथा च विषलवमपि अकृतप्रतिकारं मारयति, यथा च

प्रभूतमपि कृतप्रतिकारं विषं न मारयति। अत्र **प्रतिकारसाधनानि** - मन्त्रं, अगदं रत्नानि च। एतेषां सम्यक्प्रयोग एव सिद्धिदायकः। एवं चातिप्रभूतमपि दोषविषं आज्ञैषणीयाभिग्रहान् कृत्वाऽप्रमत्तः साधुस्तत्कर्म निर्जयति। शुभयोगे सति कषायाभावेन तत्कर्मणः क्षिप्रं नाशः।

भावो गुरुक एव तीर्थंकराज्ञारूपसह-कारियोगात्। एतदपेक्षया ऋषिघातादिजन्यं कर्म तुच्छमल्पं च। तथाविधाग्नितृणवत्। अतः शुद्धाज्ञायोगमीमांसा कार्या। भावतो-

ऽन्धो मिथ्यादृष्टिः, दृष्टिरहितत्वात्।

**सम्यग्दृष्टिस्तु** सज्जाक्षतुल्यः, तस्यैव च सम्यगुत्सर्गादिविवेचकत्वात्, तथा ज्ञानवत्त्वात् - करणे पुनः दृढचारित्रमोह-तीव्रवीर्यान्तरायोदयाद् न तेषां प्रवृत्तिः, श्रीकृष्णश्रेणिकादीनामिव।

एवं चाभिग्रहविशेष एव कर्मविशेष-निर्जराकृद् इति सिद्धम्। जीर्णश्रेष्ठिनो मनोरथ एवाभिग्रहविशेषः, 'यदि प्रविशति तदा भिक्षां ददामि' इत्येवंरूपः। एवं च मनोरथविशेषात् कार्यसिद्धेः, तथाविध-

भ्रातृद्वयवत्। एवं च धर्मानुष्ठानेषु बुधजनेनाविराधनया यत्नः कार्यः। न तु क्रोधादिसङ्क्लिष्टे धर्मानुष्ठाने।

(१) **अक्षमा** - परनिंदाकृत्-क्षपको मासोपवासादिक्षपणकारी।

(२) **मात्सर्यं** शिष्यं प्रति - आगमी-शास्त्रार्थोभयकुशलः।

(३) **क्रोधः** - विनयरत्नः - उदायि-नृपमारकः।

(४) **इर्ष्या** - या पूजा अन्यपत्नीः प्रति-कुन्तलदेवी राजपत्नी।

अयं च सङ्क्लेशो दुःखरूपो दुःखफलोऽतस्त्याज्यः। उपदेशसाफल्यं तु चतुर्थादिगुणस्थानारम्भकाणां, विशिष्टगुणस्थानात् पतितभावमुपगतानां वा, न पुनः समधिष्ठितगुणस्थानकानाम्।

अत एव च प्रतिदिवसमपि **सूत्रार्थकरणं** युज्यते। उत्तरोत्तरार्थविशेषप्राप्तेः, अपूर्वज्ञानग्रहणेन **केवलोत्पत्ते**ः श्रवणाच्च। गुणस्थानकपरिणामविशेषप्राप्ते सति न तद्व्याघातः, अत्यन्ताराधनया संक्लेशहानिभावात्। **प्रथमादिव्रतेषु** यथाक्रमं-

जिनधर्मः, सत्यनामा गोष्ठीश्राद्धः सुदर्शनो धर्मानन्द आरोग्यद्विजानां दृष्टान्तानि परि-भावनीयानि। एतेषां **व्रतपरिणामः** धीर उदार गुरुकः, आराधनासाधकत्वेन सज्ज्ञा-नश्रद्धानयुक्तत्वात्, उत्पन्नरुचेर्दोषज्ञानपूर्व-कनिवृत्तिसंभवात्। नान्यथा। व्रतभङ्गं जानन् श्रद्दधानश्च कथमन्यथाऽऽचरति।

"**तुच्छं कार्यं भङ्गे, अभङ्गे नियमतो गुरुकं निर्वाणादिकम्**" इति। इदं परमगुरुवचनम्, अत एव भूरिप्रज्ञात्वेन न लङ्घयति।

“तथा च जीवस्य **स्वाभाविकः** व्रतपरिणामः, अव्रतपरिणामस्तु कर्मजन्य-त्वेन **वैभाविकः**” एवं च तत्त्वतो विचार-णीयम्। व्रतपरिणामे सति एवमपि विचारति यथास्थितं गुणदोषयोरल्प-बहुत्वम्। ततः सम्यक्प्रवर्तनेन निर्जरा-सिद्धेः। न च कर्मणां पूर्वकृतानां दुश्चीर्णानां क्षयमृते मोक्षः। यदा तु सम्यक्सहने न शक्तिस्तदा **विधिना प्रतिकारो**ऽपि कार्यः। फासुयं एसणीयं कीयं पूई मिस्सं अहाकम्मं च जयणाए।

**आर्तध्यानाभावे** सम्यक् सोढव्य-मन्यथा पूर्वोक्तविधिना प्रतिक्रियाऽपि। भावतो व्रतधर्मे सर्वत्र मातृस्थानं (मायां) वर्जयति। एवं च न आत्मद्रोहः, मातृ-स्थानानासेवनतो गुणस्थानकपरिणामे सति सकलकल्याणा मार्गगामिभावा परिणाम-सुखावहा भवन्ति। महाव्रतानि, **समितयः**- प्रवृत्तिरूपाः, **गुप्तयः** -प्रवृत्तिनिवृत्तिरूपा च समितः सन् नियमाद् गुप्तः, कुशल-वचनोदीरकः पुनः वाचा समितो गुप्तश्च।

पूर्वं गुप्त्यादीनां ज्ञानं ततो निर्व्याघातेन

प्रवृत्तिः। स्वरूपावगमो हेतुः, व्याघात-वर्जिता कार्ये प्रवृत्तिः स्वरूपम्। अनन्तर-योगाश्चानुबन्ध इति। एवं च विशिष्टव्यस-नापत्तावपि भव्यसत्त्वानां चारित्रे विशेष-क्षयोपशमप्राप्तौ सति भवति भावः।

देहस्यासामर्थ्ये पुनः स्वाशयशुद्धेर्न हानिः, न वा वैपरीत्यम्। सुपुरुषस्य चारित्रेऽकार्यानाचरणस्वभावबद्धत्वात्। प्रायो द्रव्यादीनां न विघ्नकृत्त्वं तथाविधलौकिक-क्रियावत्, स्वादुभोजनज्ञवद् वा। एवं च दुष्षमायामपि चारित्रिण असद्ग्रहहीनाः

प्रज्ञापनीयाः श्राद्धाः क्षान्त्यादियुक्ताः। ज्ञानदर्शनयोः सद्भावे चारित्रम्। अतो ज्ञानदर्शनबलाद् न तेषामसद्ग्रहादयः। अत एव स्वाध्यायादीषु शुद्धचरणार्थं यत्नः। एवं च प्रतिदिनं सज्ज्ञानवृद्ध्या गुरुलाघवज्ञानेन कल्याणपरंपरा।

**एतदज्ञाने पुनः** - असद्ग्रहात्, बाह्यतुच्छयोगरतत्वात्, गुरुकर्मदोषात्, गुरुकुलवासादिरूपप्रधानयोगं परित्यजन्ति। गुरुकुलवासत्यागेन तु शुद्धभिक्षावृत्तिरपि न शस्ता, तथाविधभौतिकदृष्टान्तात्। न चात्र

कोऽपि गुणः, गुरुकुलवासे तु गुरुतर-गुणसद्भावात्।

'**णियमा धम्मस्स मूलं तित्थ-यराणा**' तद्भङ्गे कथं धर्मस्तथा च आचारप्रथमसूत्रेऽपि गुरुकुलवास एवाऽऽ-सेव्यतयोक्तो ज्ञानभाक्त्येन दर्शनचारित्रयोश्च स्थिरतरपरिणामजनकत्वाद् गुरुकुल-वासस्य।

एकाशनत्यागेन उपवासोऽपि न सुन्दरः, एकाशनस्य नित्यत्वाद् अन्यस्य च नैमित्तिकत्वात्। **अहो णिच्चं तवो कम्मं**

इत्यादिसूत्रप्रामाण्याच्च।

एवं च गुरुलाघवज्ञानं भवनिर्वेदात् स्वाध्यायादिसेवनम्।

**स्वाध्यायफलम्** - गंभीरभावानां ज्ञानम्। तेन च श्रद्धातिशयसंपादनात् चरणरूपसत्क्रियासद्भावः, एवं च नित्यं तत्र पक्षपातः, क्रिया च, ततो विशिष्टकर्मक्षयः सानुबंधः, न चानाचारकारणं कर्म भवति, ततो विशुद्ध्यमानः सन् क्षीणसर्वकर्मा भवति।

एवं चान्यशास्त्रेष्वपि अकरणनियम

उक्तः। स च युक्त एव अकरणनियमः- पापेऽप्रवृत्तिरूपः।

**जं अत्थओ अभिण्णं,**
**अण्णत्था सद्दओ वि तह चेव।**
**तम्मि पओसो मोहो,**
**विसेसओ जिणमयठियाणं॥६९३॥**

**सव्वप्पवायमूलं,**
**दुवालसंगं जओ समक्खायं।**
**रयणागरतुल्लं खलु,**
**तो सव्वं सुंदरं तम्मि॥६९४॥**

देशविरतिगुणस्थानकाद् विशिष्टतरः

सर्वविरतिगुणस्थानेऽकरणनियमस्य सद्-भावः। अत एवाशयभेदात् **सर्वत्रैव** गुणस्थानेष्वयमकरण नियमोऽवगन्तव्यो विशेषरूपः। अत एव च न वीतरागाणां गर्ह्यकार्यकरणापत्तिः। एवं चानुदयरूपानु-बन्धव्यवच्छेदोऽपि।

**अकरणनियमे संजाते** न कदाचि-त्पापे प्रवृत्तिः। एवं भावसंयतानां सुख-परम्परासिद्धिः। गर्ह्यव्यापारबीजभूतकर्म-विलय एवाकरणनियमतः सुखपरम्परा-सिद्धेः। एतस्मिन्नपि काले भावसंयतानां

सिद्धिफलं बाह्यानुष्ठानं ज्ञेयम्। **यतना**- एवं चाज्ञानुसारिणी यतना, धर्मजननी, पालनी तद्वृद्धिकरा एकान्तसुखावहा च। यतनायां वर्तमानो जीवः सम्यक्त्वज्ञानचरणानां श्रद्धाबोधाऽऽसेवनभावेनाऽऽराधकः। द्रव्यादिवैधुर्यलक्षणापदि यतना सम्यग्दर्शनसाधिका।

यतनाया ज्ञानोपायः - इदं सानुबन्धमिदं च निरनुबन्धम् - इत्यादिकं न इन्द्रियगोचरं तत्कथमसर्वज्ञो जानाति य सर्वज्ञवचनाद् गीतार्थ उत्सर्गापवादविज्ञो मन-

आदिभिरुपयुक्तः सन् जानाति, ज्योतिष्कवत्, कुशलवैद्यवद्वा। त्रिविधनिमित्तोपयोगशुद्धितोऽनेषणीयज्ञानं यथा परिशुद्धं भवति तथैतदपि। सूत्र आदरवतो न किमपि दुर्लभम्। यतनाया अभावे पुनः त्रयाणामपि नाराधकः, आज्ञायां श्रद्धानाभावात्।

द्रव्यक्षेत्रकालादिसंगतं भगवताऽनुष्ठानमुक्तम्, भावविशुद्धं सत् फलं निष्पादयति।

**नवि किंचि पडिसिद्धं,**

**नाणुण्णायं जिणवरिंदेहिं।**

**तित्थयराणं आणा,**

**कज्जे सच्चेण होयव्वं ॥७७९॥**

**मणुयत्तं जिणवयणं च,**

**दुल्लहं भावपरिणए उ।**

**जह एसा निप्फज्जइ,**

**तह जइयव्वं पयत्तेण ॥७८०॥**

आज्ञाया निष्पत्तिः - बुद्धिमता उत्सर्गापवादज्ञानात्, यत्नात्, सूत्रानुसारत नयनिपुणम्।

दोसा जेण निरुंभंति जेण खिज्जंति पुव्वकम्माईं। **उत्सर्गापवादाः** परस्परम-

पेक्षमाणा उच्चनीचैर्भेदवत्

उत्सर्गः - दव्वादिएहिं जुत्तस्सु-स्सग्गो जदुचियं अणुट्ठाणं।

अपवादः - रहियस्स तमववाओ उचियं चिय परस्स न उ तस्स॥

उपदेशसर्वस्वम्- जह खलु सुद्धो भावो आणाजोगेण साणुबंधोत्ति। जायइ तह जइयव्वं सव्वत्थामेसु दुगमेयं॥७८५॥

यथाऽऽज्ञया बहुकं सिध्यति तथा

यतनीयम्। गतानुगतिकं प्रमादरूपं च नाचरणीयम्।

**केषां चारित्रम्?** - ये संसार-विरक्ताः, आज्ञायां रक्ताः, यथाशक्त्या निर्जरणार्थं चेष्टन्ते। ये तु **कर्मगुरवः** शक्तौ सत्यामपि निषिद्धमाचरन्ति तेषां विषस्येवापायो ध्रुवम्।

**कारणप्रतिसेवा** पुनः **भावेण असेवण** त्ति आज्ञायाः शुद्धत्वात्।

अथ च लौकिकलोकोत्तरविरुद्धार्थ-सेवायामपि विगतमायः पश्चात्तापानुगत-

भावः पापक्षयार्थम्, तथाविधचौरवत्, शूलारोपेऽपि न तस्य नाशः। पश्चात्तापेन तत्कर्मणोऽपगमात्।

**न** च निष्ठुरक्रियारूपत्वात् चारित्रस्यात्र कलौ कथं भवति निर्वाणहेतुः ? इति **वाच्यम्**। आज्ञावतां कलौ न चारित्रमिति व्यामोह एव, भगवता **दुप्पसहंतं चरणं** इति प्रतिपादितत्वात्। आज्ञाबाह्यानां तु जिनकालेऽपि न चारित्रम्। आगमः, श्रुतम्, आज्ञा, धारणा, जीतम्- इति **पञ्चधा प्रमाणम्**। आचरणाऽपि प्रमाणं, अन्यथा

तीर्थंकराशातनाप्रसङ्गात्। आचरणा-लक्षणं तु

**असढेण समाइन्नं जं**
**कत्थइ केणइ असावज्जं।**
**न निवारियमन्नेहिं य**
**बहुमयं एयं आयरियम्॥८१३॥**

तथा च **जिनवचनप्रतिकूलानुष्ठानेषु** अशुभकर्मविपाकिषु जन्तुषु प्रद्वेषो मत्सरोऽक्षमा च न कार्या। अपि तु '**एषा भवस्थितिः**' इति चिन्तनीयम्। केवलं मार्गनिरतेन तेषां सदा सङ्गस्त्याज्यः।

असति च तथाविधे क्षेत्रे तैः सह शुद्धप्ररूपणा चारित्रपालनस्यानुपघातनेनानुवर्तनीया। स्वस्मिन्बहुमानात् राजव्यसनादिसाहाय्यकारित्वाच्च। **अन्यथा** क्षोभादिभ्य स्वपरोपघातः, आत्मनो लघुता, तेषां बोधिघातकफलः पापबन्धः। तस्माद् द्रव्यतस्तैः सह कार्यमासाद्यारक्तद्विष्टेन तेषामनुवर्तनं कार्यम्। न च बहुमानलक्षणभावात्। तथाविधग्रस्तराजवत्। एवं बहुकुग्रहे जने कुग्रहस्यानुपजीवनेन भावेन धर्मराज्ये शुभः कालो भवति। **आज्ञा**-

**योगेनात्मनि रक्षणा** नान्यथा।

**परिशुद्धाज्ञायोगस्योपायः - तीर्थे विधिना सूत्रार्थग्रहणम्। तीर्थम्** - गुरुः सूत्रार्थोभयज्ञः क्रियापरः, अत्यर्थं प्रवचनानुरागी, स्वपरसमयप्रज्ञापकः प्ररूपको वयसा व्रतेन च परिणतः प्राज्ञो हेतुवादपक्षे हेतुतः, आगमवादे चागमतः **सा स्वसमयप्ररूपणा।** अन्यथा सिद्धान्तविराधकः।

एतादृशगुरोः **सकाशात्** सूत्रार्थयोर्विशुद्धिः, ततोऽविकला ज्ञानादयः शुद्धाश्च।

सुत्ता अत्थे जत्तो

अहिगयरो णवरि होइ कायव्वो।

एत्तो उभयविसुद्धि त्ति

मूयगं केवलं सुत्तं॥८५५॥

**विधिः** - यथा ललितविस्तरायां मण्डली, निषद्या, अक्षाः, कृतिकर्म, कायोत्सर्गः, ज्येष्ठवन्दनम्, उपयोगः, संवेगः, प्रश्नोत्तरम्, सङ्गतार्थः।

चतुर्धा सूत्रपदार्थादिः - पदार्थादिभिश्चतुर्भिः संपूर्णसूत्रावगमः, अन्यथा विपर्यासेनानिष्टफलापत्तेः।

**पदार्थः** - दर्शनमात्रम्, इष्टानिष्टप्राप्ति-परिहाराऽक्षमम्।

**वाक्यार्थः** - शत्रुवेषभेददर्शनतुल्यम्, अयमप्यक्षमम्।

**महावाक्यार्थः** - बालाबलादिभि-स्तुल्यम्, जिज्ञासितार्थसिद्धिः।

**ऐदम्पर्यम्** - एवं शुद्धः अधिकारी प्रष्टव्यः। नान्यः।

**न हिंस्यात्सर्वभूतानि।**

**पदार्थः** - प्रसिद्धः - मनआदिभिः सर्वजीवानां बाधा न कुर्यात्।

**वाक्यार्थः** - आरम्भप्रमादिनां चैत्य-गृहलोचाकरणं प्राप्तम्। इतो हिंसाकरणं परपीडाया अनुगमात् - चालनारूपो वाक्यार्थः।

**महावाक्यार्थः** - अविधिकरण आज्ञाविराधनया ततो दुष्टमेव, तस्माद् विधिना यतितव्यम्। चालनाया प्रत्य-वस्थानम् - उत्तरम्। एवं विधिना क्रियमाणेऽहिंसा अनुबन्धभावात् परमार्था।

**ऐदम्पर्यम्** - धर्मे तु आज्ञैव श्रेष्ठा-इति।

सूत्रकृताङ्गे सूत्रे तु

**जे उ दाणं पसंसंति**
**वहमिच्छंति पाणिणं।**
**जे य णं पडिसेहंति**
**वित्तिच्छेयं कुणंति ते॥**

**पदार्थः** - द्वावपि दान-प्रशंसानिषेधौ पापौ शस्त्रादिरूपदानेन हिंसाभावाद्, निषेधे सति च वृत्तिव्यवच्छेदसंभवाच्च।

**वाक्यार्थः** - एवं दानादिगोचर-देशनाया व्यवच्छेदः प्राप्तः। स च न युक्तः सर्वधर्मशास्त्रेषु चतुर्विधतयोक्तत्वात्। ततो दानविधानमिदं निषेधश्च विशेषविषयभागेन द्रष्टव्यः।

**महावाक्यार्थः** - आगमोक्तदान-निषेधदेशनायां न दोषः। तत्र **दानविधिः** - 'णायागयाणं कप्पणिज्जाणं, अन्नपा-णाईणं देशकालसद्धासक्कारकमजुयं आया-णुग्गहबुद्धीए संजमाणं दाणं' तथा समणं माहणं वा फासुएणं एसणिज्जेणं एगंतसो णिज्जरा। अफासुएणं अणेसणिज्जेणं बहुआ णिज्जरा अप्पे पावे कम्मे अपडिहय-पावकम्माणं उ एसणिज्जेणं अणेसिज्जेणं वा एगंतसो पावे कम्मे। तथा अयं विधि-र्मोक्षार्थे दाने, **अनुकम्पादानं** तु न कुत्रापि

निषिद्धम्। संथरणंमि अशुद्धं दोण्हवि गिण्हंतदेंतयाणऽहियं। पात्रे दीनादिवर्गे च दानं विधिवदिष्यते। आगमबाधया दानविधिप्रतिषेधे दोषाः।

**ऐदम्पर्यम्** - आगमबाधादोषस्तथा दोषाभावेनागमाबाधया गुणहेतुतो मोक्ष-कारणम्।

एवं प्रतिसूत्रं व्याख्येयम्। अन्यथा-ऽन्यतरगमनाद् दृष्टेष्टविरोधात्। अनभि-निवेशाद् आगमार्थः श्रुतं भवति, न तु चिन्ताभावनारूपम्।

**श्रुतज्ञानम्** - वाक्यार्थमात्रगोचरम्, मिथ्याभिनिवेशरहितम्, कोष्ठबीजवत्।

**चिन्ताज्ञानम्** - महावाक्यार्थजात-मतिसूक्ष्मसुयुक्तिरूपचिन्तायुक्तम्।

**भावनाज्ञानम्** - ऐदम्पर्यगतं विध्यादौ उच्चैर्यत्नवत्, सद्रत्नदीप्तितुल्यम्। एवं नियमतो ज्ञानमाज्ञायोगः, ज्ञानी च निश्चयेन बहुप्रतिबन्धयुतमपि इष्टं कार्यं साधयति, कांश्चित्सत्त्वान् मार्गे योजयति, बीजाधानं च करोति। अतः जिनवचनमप्रमादसारम्। गंभीरमपि जिनवचनं दुष्करमपि साध्यम्,

अप्रमादवतो राधावेधवद् नान्यथासिद्धिः। यथोत्तरं प्रधानम्।

**अन्ये वदन्ति** - त्रिविधमनुष्ठानम्

(१) सततम् (२) विषय (३) भाव-अभ्यासात्।

(१) सतताभ्यासः - नित्यमेवोपादेयत्वेन लोकोत्तरगुणप्राप्तिहेतुः। मातापितादिविनयवृत्तिः।

(२) विषयाभ्यासः - मोक्षामार्गस्वामिविषय अर्हति पूजादिकरणस्य अभ्यासः

(३) भावाभ्यासः - भवादुद्विग्नस्य सम्यग्दर्शनादिभावानामभ्यासः। अत्र निश्चयनयेनाद्यद्विकं न युक्तिसहम्, विषयेन भावेन च परिहीणत्वात्। अनुष्ठानस्य परमार्थोपयोगरूपत्वाद् भावस्य। व्यवहारतः पुनः अपुनर्बन्धकादिषु युज्यत एव।

भावाभ्यासः - अत्यन्ततीव्रभावः, कामं निर्वेदः, संवेगः। एवं च मोक्षानुकूलभावसङ्गतमेव त्रयमपि अनुष्ठानमाज्ञानुकूलाचरणमेव। अपुनर्बन्धकादीनामेव भावाद् नान्येषामतिचारादिपरिहारेण शुद्धयोगेषु

वर्तनं प्रयत्नश्च। स च शुद्धयोगः कल्याण-मित्रादियोगात्।

(१) भक्तिनिर्भरमानसैः सिद्धान्तज्ञायकाः सेवितव्याः।

(२) आत्महितवचनं तेषां नियमात् श्रोतव्यम्।

(३) यथाशक्ति दानं देयम्।

(४) परपीडा न कर्तव्या।

(५) स्त्रीगोचरः सङ्कल्पो न कर्तव्यः।

(६) भवस्वरूपं भावनीयम्।

(७) लोकोत्तरभावानुगताः पूज्या मान्याः।

(८) जीवलोके न केऽपि परिभवितव्याः।

(९) अनुशीलनीयो विशिष्टलोका-चारः।

(१०) न निन्दनीयाः केचन।

(११) कर्तव्यो गुणानुरागः।

(१२) न कार्यः कुशीलसंसर्गः।

(१३) वर्जनीयाः क्रोधादयः।

(१४) वर्जनीयः सर्वानर्थमूलः प्रमादः।

इति


अयमुपदेशपदसिद्धान्तात्

समुद्धृत्योक्तः।

यदुपक्रियते सत्सु
जीवन्मुक्तस्य दर्शनात्।
कृतस्तत्सन्निबद्धानां
परैरपि परिश्रमैः?॥

- વિમુક્ત્યુપનિષદ્

# Don't Miss it.




मूलकाराः

महो. श्रीयशोविजयगणिवराः

वृत्तिकाराः

आ. श्रीकल्याणबोधिसूरयः

સુકૃત સહયોગી

શ્રી પ્રેમવર્ધક દેવાસ શ્વે.
મૂર્તિ. જૈન સંઘ
દેવાસ, અહમદાવાદ

જ્ઞાનનિધિના સદ્‌વ્યયની
ભૂરી ભૂરી અનુમોદના

૧૮૬